Postal Regd.No. GAMC- 1553/2022-2024

ISSN 2454-6313

संस्कृत-

# साम्प्रतम्

(Sampratam means "Current")

(संस्कृतमासिकी पत्रिका)

वर्ष : १९ अङ्क : २२०

ओगष्ट - २०२४

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2022-2024 issued by SSP Ahmedabad. Valid upto 31-12-2024. containing 8 pages ₹ 10

## चिन्तनम्

सतीशः गज्जर्

### निदानम्

कश्चित् राजा केनचित् दुःसाध्येन रोगेण आक्रान्तः । निपुणाः अपि वैद्याः तं चिकित्सितुं न अलम् । अथ कदाचित् नृपस्य वृद्धः मन्त्री उक्तवान् – राजन् ! कञ्चित् पर्वतवासिनं संन्यासिनम् अहं नाम्ना जानामि । सः भवतः रोगं हरेत् । ततः सादरम् आनीतः संन्यासी अपि स्थितिम् अवलोक्य निवेदितवान् – 'उपायः वर्तते, परम् अनुष्ठानं दुष्करम् एव ।' राज्ञा अपि उक्तं यत् भवान् उपायं निर्दिशतु, अहम् अनुष्ठानं प्रति चिन्तयिष्यामि । संन्यासी किञ्चित् विहस्य उक्तवान् – 'भवान् सहस्रं बालकान् हिंसयित्वा, तेषां रुधिरेण स्नानं करोतु ।' एतावत् उक्त्वा संन्यासी राजगृहात् निर्गतः ।

अत्र दयालुः राजा तद्वचनेन परमं विषादं गतः । गभीरं चिन्तयन् सः 'हिंसनेन स्वास्थ्यस्य क्रयणं मास्तु' इति निर्णयं कृतवान् । परन्तु तस्य मन्त्रिणः, अन्तःपुरं च हिंसने दृढतां दर्शितवन्तः । तेषां मतेन नृपस्य जीवितं महत्तरम् । अन्ततः नृपस्य अहिंसाधर्मः पराजितः । बालानां मारणं निश्चितम् ।

योजनानुसारं बालकानां सङ्ग्रहः प्रवृत्तः । एतत् वृत्तं ज्ञातवतः नृपस्य निद्रा व्यपगता । तस्य विचारचक्रे एकः एव विषयः निरन्तरं भ्रमति स्म – 'एकस्य मनुष्यस्य जीवनार्थं क्रियमाणा महती हिंसा तु अधर्मः एव ।'

एवं शोचतः तस्य, मारणकालः समागतः । राज्ञः पुरतः बलिपशूनाम् इव स्थितानां बालानां मारणं नातिदूरे दृश्यते स्म । ततः अन्तिमे क्षणे नृपः घोषणां कृतवान् – 'भो भो वधकाः ! बालाः मुच्यन्ताम् ।'

अथ एवम् अनुष्ठिते सति, गच्छत्सु दिनेषु नृपस्य स्वास्थ्ये वृद्धिः अभवत् । तस्य रोगः शनैः शनैः मूलतः व्यपगतः । विस्मयं गतः राजा तं संन्यासिनं पुनः स्मृतवान् । उपस्थितः संन्यासी उक्तवान् – 'राजन् ! भवान् एतेषु दिनेषु स्वीयं स्वास्थ्यं प्रति न चिन्तयन् केवलं नैकेषां बालानां हिंसानिवारणं कथं भवेत् इत्येव चिन्तितवान् । ततः भवता कृतः अन्तिमः निर्णयः रोगमुक्तेः हेतुः अभवत् । भवान् स्वकीयं मरणं स्वीकृत्य परहिंसां निवारितवान् । अत्र भवतः प्राणशक्तेः प्रभावः अस्ति, कोऽपि चमत्कारः नास्ति ।'

वस्तुतः संसारं परितः विद्यमाना स्वार्थवृत्तिः रोगनिवृत्तौ बाधिका भवति । परार्थाय जीवन् मनुष्यः रोगैः प्रायः न क्लिश्यते । प्रोन्नतं मङ्गलमयं चिन्तनम् अपि रोगमुक्तेः कारणं भवितुम् अर्हति । द्वेषचौर्यकलहादिभ्यः दुर्गुणेभ्यः मुक्तः मनुष्यः भगवतः प्रियः भवति । तस्य स्वास्थ्यं सुलभम् एव ।

## गुरोः कर्तव्यम्

– जातककथा

ब्रह्मदत्तः यदा काशीराज्यं पालयन् आसीत् तदा बोधिसत्त्वः तक्षशिलायां शिल्पाचार्यरूपेण जन्म प्राप्तवान् आसीत्। तस्य सकाशात् शिल्पशास्त्रम् अध्येतुं देशविदेशेभ्यः राजकुमारादयः आगच्छन्ति स्म।

तक्षशिलानगरस्थस्य शिल्पाचार्यस्य कीर्तिं श्रुतवान् काशीनरेशः निश्चितवान् यत् विद्याभ्यासाय मया मम पुत्रः अपि तत्र प्रेषणीयः इति। किन्तु ऊनषोडशवर्षीयस्य राजकुमारस्य तत्र प्रेषणं मन्त्रिसामन्तादयः न अनुमतवन्तः। एकाकितया तत्र गमनं, गुरुकुले गुरुशुश्रूषा इत्यादयः कष्टाय इति मत्वा ते अवदन् – ''महाराज ! शिल्पशास्त्रनिपुणाः अस्माकं नगरे अपि सन्ति एव। एवं स्थिते तक्षशिलां प्रति युवराजस्य प्रेषणम् अनुचितं स्यात्'' इति।

किन्तु राजा तेषां संस्तुतिं न पुरस्कृतवान्। सः कदाचित् पुत्रम् आहूय पादरक्षायुगलं ताडपत्रनिर्मितं छत्रं च दत्त्वा अवदत् – ''भवान् तक्षशिलां गत्वा शिल्पाचार्यसकाशात् विद्याम् अधिगृह्णातु, शिक्षणं समाप्य प्रत्यागच्छतु च। गुरवे दक्षिणारूपेण दातुं सहस्रं रजतनाणकानि नयतु च'' इति।

पितुः एतस्य आदेशस्य अनुगुणं राजकुमारः एकाकी निर्गतवान्। सहस्रस्य रजतनाणकानां ग्रन्थेः वहनेन सः नितरां श्रान्तः जातः। मध्येमार्गं तत्र तत्र विश्रान्तिसुखम् अनुभवन् सः कष्टेन एव तक्षशिलां प्राप्तवान्।

सः शिल्पाचार्यम् आगमनोद्देशं विवृतवान्। सहस्रं रजतनाणकानि गुरवे समर्प्य विद्याभ्यासम् आरब्धवान् सः। शिल्पशास्त्रस्य अध्ययनं सम्यक् एव प्रवृत्तम्। तस्य बुद्धितीक्ष्णतां दृष्ट्वा गुरुः नितरां सन्तुष्टः।

कानिचन दिनानि अतीतानि। प्रतिदिनं गुरुः शिष्यः च नगरात् बहिः स्थितायां नद्यां स्नात्वा आगच्छतः स्म। एवम् एकस्मिन् दिने यदा तौ स्नानार्थं तत्र आगतवन्तौ तदा काचित् वृद्धा अपि तत्र आगता। सा आत्मना आनीतान् तिलान् जलेन क्षालयित्वा शोषणाय वस्त्रस्य उपरि प्रसारितवती।

राजकुमारः एतत् सर्वं दृष्टवान्। सः झटिति स्नानं समाप्य तीरम् आगतवान्। वृद्धायाः दृष्टिः अन्यत्र आसीत्। अतः सः मुष्टिमितान् तिलान् स्वीकृत्य खादितवान्। वृद्धया एतत् कथमपि लक्षितम् एव। तथापि सा मौनेन स्थितवती। अनन्तरदिने अपि वृद्धा तिलान् आतपे प्रसारितवती। राजकुमारः एतस्मिन् अपि दिने तिलान् चौर्येण स्वीकृत्य खादितवान्। एतस्मिन् दिने अपि वृद्धा मौनेन एव स्थितवती। तृतीये दिने अपि एषा घटना पुनः आवृत्ता। राजकुमारस्य चौर्यप्रवृत्तिविषये सा वृद्धा नितराम् असन्तुष्टा जाता।

शिल्पाचार्यः स्नानं समाप्य यदा तीरम् आगतः तदा वृद्धा तम् उक्तवती – ''आचार्यवर्य ! आ त्रिभ्यः दिनेभ्यः भवतः शिष्यः मम तिलान् चोरयित्वा खादितवान् अस्ति। तिलाः नष्टाः इति मम नास्ति खेदः। तरुणस्य एतस्य चौर्यप्रवृत्तिः न अनुवर्तेत इति मम इच्छा। एतस्य व्यवहारः भवतः यशसि कलङ्कं कल्पयेत्। अतः सः अग्रे एवं यथा न कुर्यात् तथा दण्ड्यताम्'' इति।

गृहं प्रत्यागतवान् शिल्पाचार्यः अन्यान् शिष्यान् सूचितवान् यत् राजकुमारस्य हस्तौ दृढतया ग्रहीतव्यौ।

ततः दण्डेन तस्य पृष्ठे प्रहारान् दत्त्वा सः अवदत् – ''भवता यत् अनुचितं कार्यं कृतं तस्य निमित्तम् एतत् दण्डनम्'' इति।

गुरोः व्यवहारेण राजकुमारः नितरां क्रुद्धः । किन्तु सः सामान्यः विद्यार्थी । विद्यार्थिनः दण्डने गुरोः अधिकारः अस्ति एव । अतः सः प्रतिकर्तुं समर्थः न जातः । क्रोधसन्तप्तः सः तस्मिन् एव समये मनसि शपथम् अकरोत् – 'राजत्वप्राप्तेः अनन्तरं केनचित् व्याजेन एतं काशीराज्यम् आनाय्य दण्डयिष्यामि' इति।

कालान्तरे युवराजस्य अध्ययनं समाप्तम् । काशीं प्रति गमनसमये सः गुरुं प्रणम्य तस्य आशीर्वादं प्राप्तवान्।

ततः सः गुरुम् अवदत् – ''मम सिंहासनारोहणस्य अनन्तरं भवता सकृत् काशीं प्रति आगन्तव्यम्। तदवसरे अहं भवन्तं यथायोग्यं सत्कर्तुम् इच्छामि'' इति। शिष्यस्य एतत् निमन्त्रणं श्रुत्वा सन्तुष्टः गुरुः तत् अङ्गीकृतवान्।

काशीं प्रतिगतः युवराजः तु केषाञ्चित् वर्षाणाम् अनन्तरम् अभिषिक्तः जातः । ततः कदाचित् सः गुरुं स्मृतवान् । झटिति कञ्चित् भटम् आहूय सः आज्ञापितवान् – ''भवता तक्षशिलां गत्वा शिल्पाचार्याय मम एतत् निमन्त्रणपत्रं दातव्यम्'' इति। शिल्पाचार्यः दूतमुखात् निमन्त्रणं प्राप्य अपि झटिति एव काशीं प्रति न प्रस्थितवान्।

ततः केषाञ्चित् मासानाम् अनन्तरं सः काशीं गतवान् । राजभवनं प्राप्य स्वस्य परिचयम् उक्त्वा आगमनोद्देशम् उक्तवान् सः। राज्ञः गुरुः उपस्थितः इत्येतां वार्त्तां श्रुत्वा सभासदः महता आदरेण तं स्वागतीकृतवन्तः। तस्य उपवेशनाय उन्नतम् आसनं कल्पितम् अपि तैः।

गुरोः दर्शनात् राजा स्वस्य पूर्वतनम् असन्तोषं स्मृतवान् । अतः सः शिल्पाचार्यं तीक्ष्णदृष्ट्या पश्यन् अवदत् – ''मुष्टिमितं तिलं यत् खादितं तदर्थं येन कठोरं दण्डनं विहितं सः हस्तगतः किं सप्राणं परित्यज्येत ?'' इति।

सभासदः यथा न जानीयुः तथा शिल्पाचार्यमात्रे भीतिम् उत्पाद्य सः दण्डनीयः इति चिन्तनम् आसीत् राज्ञः। किन्तु राज्ञा यथा चिन्तितं तथा न तु प्रवृत्तम्। शिल्पाचार्यः किञ्चिदपि न भीतः।

सः पूर्वतनीं घटनां सर्वेषां पुरतः प्रकाशितवान् – ''हे राजन्! शिष्यः यदा दोषम् आचरति तदा सन्मार्गे तस्य आनयनाय प्रयासः गुरोः कर्तव्यम्। यदि अहं तस्मिन् दिने भवन्तं दण्डितवान् न स्यां तर्हि भवान् अद्य राजा न, प्रत्युत लुण्ठाकः अभविष्यत्। विवेकिनः पूर्वं दण्डितस्य विषये खिन्नाः न भवन्ति, अपि तु कृतज्ञताभावं वहन्ति'' इति।

वस्तुस्थितिः सभासद्भिः सर्वैः ज्ञाता । ततः राजा नितराम् अपमानितः जातः । सः झटिति सिंहासनात् अवतीर्य गुरोः पादौ गृहीत्वा अवदत् – ''अयि महानुभाव ! मया यदा असमीचीने मार्गे पदं स्थापितं तदा भवान् मां सत्पथम् आनीतवान्। अतः अहं भवद्विषये नितरां कृतज्ञः अस्मि'' इति।

राज्ञि जातं परिवर्तनं दृष्ट्वा शिल्पाचार्यः नितरां सन्तुष्टः । सभासदः अपि सन्तुष्टाः । ततः राज्ञः अनुरोधं पुरस्कुर्वन् शिल्पाचार्यः तक्षशिलावासं परित्यज्य काश्याम् एव वासम् आरब्धवान् । आस्थानस्य आचार्यपदं विभूषयन् सः काले काले योग्येन मार्गदर्शनेन राजानं सत्पथे प्रवर्तितवान्।

## अभिषेकनाटकम् ( ग्रन्थपरिचयः )

व्योम शाहः

**अनुवर्तते**

महाकविभासप्रणीते अभिषेकनाटके एतावता अस्माभिः दृष्टं यत् सुग्रीवं नृपत्वेन राज्ये पुनः स्थापयितुं रामलक्ष्मणौ कृतनिश्चयौ। वालि–सुग्रीवयोः भीषणं युद्धं सञ्जातम्। प्रच्छन्नः श्रीरामः तु धनुषा शरं मुक्तवा वालिनं पातयति। वाली रामस्य तादृशं कृत्यं गर्हते पृच्छति च यत् किमर्थं सः छलेन तं प्रति प्रहारं कृतवान्।

ततः उत्थाय शरे नामाक्षराणि पठित्वा रामम् उद्दिश्य कथयति–

''युक्तं भो नरपतिधर्मम् आस्थितेन युद्धे मां छलयितुम् अक्रमेण राम !'' वीरेण व्यपगतधर्मसंशयेन लोकानां छलम् अपनेतुम् उद्यतेन॥ वाली रामस्य तादृशं कृत्यम् आक्षिपति गर्हते च। सुग्रीवः हनुमन्तम् अङ्गदम् आह्वातुं दिशति। अङ्गदोऽपि वालिनः स्थितिं दृष्ट्वा दुःखितः। वाली तं निवार्य सुग्रीवं प्रति कथयति –

**मया कृतं दोषमपास्य बुद्ध्या त्वया हरीणामधिपेन सम्यक्।**
**विमुच्य रोषं परिगृह्य धर्मं कुलप्रवालं परिगृह्यतां नः॥**

सः सुग्रीवाय स्वीयकुलरूपां हेममालां समर्पयति। ततः अचिराद् एव वाली मृत्युम् आप्तवान्। अङ्कस्याऽन्ते रामः सुग्रीवस्य राज्याभिषेकं कल्पयितुं लक्ष्मणम् आज्ञापयति।

अत्रान्तरे सुग्रीवेण सीतायाः अन्वेषणं कर्तुं सर्वासु दिक्षु वानराः प्रेषिताः। सर्वेऽपि प्रत्यागताः अङ्गदम् अतिरिच्य। अतः बिलमुखः अङ्गदस्य प्रवृत्तिं ज्ञातुं दक्षिणामुखं प्रेषितः। तत्रैव ककुभः तं निर्दिशति यत् सीतायाः वृत्तान्तं जटायुषः विज्ञाय लङ्कां गन्तुं हनुमता सागरः लङ्घितः। सर्वमेतत् विष्कम्भेन विज्ञापितम्। अङ्कस्य प्रारम्भः सीतायाः विरहवेदना–प्रकटनेन भवति। हनुमान् लङ्कां प्राप्तवान्। तत्र रावणभवनस्य विन्यासं दृष्ट्वा आश्चर्यचकितः। सर्वत्र अटित्वाऽपि तेन न सीता प्राप्ता। सः उन्नतं हर्म्यम् आरुह्य प्रमदवनं दृष्टवान्। तत्र गत्वा किञ्चिद् भ्रमणं कृत्वा सीतां दृष्टवान्। तदैव तत्र रावणः प्रविशति। आत्मानं गूहितुं सः समीपस्थस्य अशोकवृक्षस्य कोटरे प्रविशति। रावणः प्रविश्य सीताम् अनुकूलयितुं प्रयत्नं करोति –

**''सीते ! त्यज त्वं व्रतमुग्रचर्यं भजस्व मां भामिनि ! सर्वगात्रैः।**
**अपास्य तं मानुषमद्य भद्रे ! गतायुषं कामपथान्निवृत्तम्॥''**

रामस्य विषये एतादृशं वचनं श्रुत्वा हनुमान् क्रुद्धः। क्रोधं धारयितुम् अशक्तः सः एव रावणं हन्तुं विचारयति। ततः विमृश्य सः तस्मात् कार्याद् आत्मानं निवारयति। सीता रावणाय कथयति ''शप्तोऽसि'' इति तदा रावणः सोपहासं कथयति यद् अनेके देवेन्द्राः दानवाः च मया रणे हताः किन्तु अद्य अहं सीतायाः त्रयाणाम् अक्षराणां श्रवणेन मोहमुपगतः इति। रावणः निर्गच्छति राक्षसस्त्रियः च सुप्ताः।

ततः कोटराद् बहिः आगत्य सीताम् उपसर्पति। सीतायाः तु संशयः जायते किं नु खलु अयं कश्चित् पापराक्षसः मां वञ्चयितुम् आगतः इति। हनुमान् स्वकीयं परिचयं प्रदाय तां शङ्कारहितां करोति। रामस्य अवस्थां श्रुत्वा सीता नितरां खिन्ना। हनुमान् कथं रामेण मिलितवान् इति सम्पूर्णं वृत्तं ज्ञापितवान्। स सीताम् आश्वासयत् यद् रामः दशाननं समुद्धर्तुं शीघ्रमेव वानरसेनया सह लङ्काम् आयास्यति। यदा हनुमान् निवर्तितुम् उद्यतः, तदा सा तस्मै कथयति

यत् मद्विषयकं वृत्तान्तं तथा रामाय निवेदय येन स शोकाकूलः न भवति। हनुमान् रावणाय स्वकीयम् आगमनं निवेदयितुं तत्र काननं चूर्णयित्वा प्रस्थानं करोति।

तृतीयाङ्कस्य प्रारम्भः भग्नायाम् अशोकवनिकायां भवति। हनुमता यः विनाशः तत्र विसृष्टः, तत् श्रुत्वा रावणः स्वयं तत्र आगच्छत्। नियुक्तेभ्यः "केन कृतम्" इति पृष्टे तत्रागतेन वानरेण निवेदितम्। रावणेन तस्य निग्रहस्य आदेशे कृते सति शङ्कुकर्णः तस्य वानरस्य पराक्रमवर्णनं कृत्वा बलार्थं (सैन्यार्थं) पृच्छति। सेवकाः सहस्रं तत्र दत्ताः क्षणमात्रेण हताः हनुमता। रावणः कुमारम् अक्षं प्रेषयति। कालान्तरेण शङ्कुकर्णः पुनरपि प्रविश्य अधिकस्य बलस्य वाञ्छां प्रदर्शयति।

**(क्रमशः... )**

## मासवार्त्ताः

**सम्पन्नः 'संस्कृतयात्रा' नृत्यनाटिकायाः प्रयोगः।**






संस्कृत-साहित्य-अकादमी, गान्धिनगरम् प्रतिवर्षं 'आषाढस्य प्रथमदिवसे संस्कृतोत्सवः' इति कार्यक्रमम् आयोजयति। एतस्मिन् वर्षेऽपि जुलाईमासस्य ६ दिनाङ्के गुजरातविश्वविद्यालयस्य अटलकलामभवने कार्यक्रमोऽयम् आयोजितः आसीत्। कार्यक्रमेऽस्मिन् एकलव्य-संस्कृत-एकेडेमी, संस्कृतविद्याप्रतिष्ठानम् इत्यनयोः संयुक्तोपक्रमेण 'संस्कृतयात्रा' नृत्यनाटिकायाः दर्शनीयः प्रयोगः अभवत्। प्रसङ्गेस्मिन् संस्कृतसाहित्यं भारतीयज्ञानपरम्परा इत्येतौ विषयौ अधिकृत्य ६५ कलाकाराः विविधाः कृतीः प्रदर्शितवन्तः। कलागुरुः माधवी झाला, कलागुरुः झङ्खना शाहः, श्रीमती भक्तिः ओझा, श्री सुरजः कुरुपः च कलाकाराणां मार्गदर्शनम् अकुर्वन्। अत्रोल्लेखनीयं यत् अस्मै कार्यक्रमाय संस्कृत-साहित्य-अकादम्या निमन्त्रणं दत्तम् आसीत्। निखिलस्य कार्यक्रमस्य परिकल्पना डॉ. मिहिर-उपाध्यायस्य आसीत्। कार्यक्रमेऽस्मिन् अकादम्याः अध्यक्षः डॉ. भाग्येशः जहा, महामात्रः डॉ. जयेन्द्रसिंहः जादवः, गुजरात-विश्वविद्यालयस्य कुलपतिः डॉ. निरजा गुप्ता, श्रीसोमनाथसंस्कृतविद्यालयस्य कुलपतिः डॉ. सुकान्तकुमारः सेनापतिः च उपस्थिताः आसन्।

## कृपया हसन्तु

कश्चन दीन: स्वकीयां स्थितिं धिक्कुर्वन् अवदत् - "एतादृशस्य जीवनस्य अपेक्षया मृत्यु: एव सम्यक् अस्ति... ।" तदैव सहसा यमदूत: आगत्य अवदत् - "अहं त्वां स्वीकर्तुम् आगतोऽस्मि ।" एतत् श्रुत्वा स: दीन: अवदत् - "भो:, कीदृशानि दिनानि आगतानि ? दीन: जन: अधुना हासार्थम् अपि किमपि वक्तुं न शक्नोति ?"

★ ★ ★ ★ ★

वैद्य: - (रमणम् उद्दिश्य) किम् जातम् ?

रमण: - श्वान: अदशत् ।

वैद्य: - चिकित्सालयस्य समय: एकादशवादनपर्यन्तम् एव वर्तते । त्वया बहि: स्थापिता सूचना न पठिता ? त्वम् एकवादने आगतोऽसि ।

रमण: - आम्, मया तु सूचना पठिता आसीत् किन्तु श्वानेन न पठिता ।

★ ★ ★ ★ ★

भगिनी गृहे दूरदर्शनं पश्यन्ती आसीत्, तां दृष्ट्वा -

भ्राता - किं पश्यन्ती अस्ति ?

भगिनी - पाकशास्त्रस्य कार्यक्रमम् ।

भ्राता - महोदये ! आदिनं पाकशास्त्रस्य कार्यक्रमं पश्यति तथापि पाकं पक्तुं तु न जानाति भवती ।

भगिनी - त्वमपि प्रतिदिनं 'को भविष्यति कोटयधिपति:' (कोन बनेगा करोडपति) इति कार्यक्रमं पश्यन् अस्ति, मया इदानीं यावत् किमपि उक्तम् ... ?

## सुभाषितम्

– संस्कृतविकिपीडियाजालस्थानात्

**यच्छक्यं ग्रसितुं ग्रस्यं ग्रस्तं परिणमेच्च यत् ।**
**हितं च परिणामे यत् तदाद्यं भूतिमिच्छता ॥**

**तात्पर्यम्** – य: प्रगतिं समृद्धिं वा साधयितुम् इच्छेत् स: यावत् शक्यं तावत्, यद् जीर्णीकर्तुं शक्नुयात् तावत्, यस्य खादनेन हितमेव परिणामं प्राप्नुयात् तादृशम् आहारं सेवेत।

**यत् सुखं सेव्यमानोऽपि धर्मार्थाभ्यां न हीयते ।**
**कामं तदुपसेवेत न मूढव्रतमाचरेत् ॥**

**तात्पर्यम्** – यस्य सुखस्य अनुभवनेन धर्मार्थयो: हानि: न भवेत् तच्च सुखं कामं (यथेच्छम्) अनुभोक्तुं शक्यते। किन्तु धर्मार्थयो: हानिकारकं सुखं मूढवत् न अनुभवेत् कदापि।

**यत्कर्म कुर्वतोऽस्य स्यात्परितोषऽन्तरात्मन: ।**
**तत्प्रयत्नेन कुर्वीत विपरीतं तु वर्जयेत् ॥**

**तात्पर्यम्** – जना: विभिन्नानि कार्याणि कुर्वन्ति। कीदृशानि कार्याणि कर्तव्यानि कीदृशानि न कर्तव्यानि इत्येतत् सर्वदा मनुष्यान् बाधते। यस्य कार्यस्य करणेन अन्तरात्मा तुष्यति तच्च कार्यम् अवश्यं करणीयम्। आनन्देन कर्तव्यं च। तस्य विरुद्धं कार्यं तन्नाम यस्य कार्यस्य करणेन अन्तरात्मन: सन्तोष: न भवति तत् कार्यं न करणीयम्।

## ज्ञानसरित्

**श्यामः पटेलः**

**बृहत्तमा नदी – ''एमेझोन''** – ब्राझिलदेशस्य ''एमेझोन'' नदी सुप्रसिद्धा । ''एमेझोन्'' इत्यस्य ग्रीकभाषायाम् अर्थः भवति – युयुत्सुजातेः महिला । यतो हि तत्रत्याः वनवासिमहिलाः युद्धार्थं गच्छन्ति स्म । कस्यचिदपि देशस्य सभ्यता वा संस्कृतिः नदीसमीपे एव सम्भवति वर्धते च इति वयं जानीमः । यतो हि तत्र नैसर्गिक–साधनसम्पत्तिः सरलतया प्राप्यते । अतः नद्याः माहात्म्यं सर्वत्र वर्तते । एतस्याः नद्याः अपि माहात्म्यं तथा च कौतुकं विद्यते । एतस्यां नद्यां विश्वस्य कस्याश्चित् नद्याः अपेक्षया पञ्चगुणितः प्रवाहः प्रवहति । नद्याः अधः भूमितलतः ४ किलोमीटरमिते गाम्भीर्ये अपि एका नदी प्रवहति । एमेझोननद्याः समीपस्थे ५५ लक्ष–स्क्वेरकिलोमीटरमिते प्रदेशे तु गाढविपिनं प्रसृतम् अस्ति । तस्मिन् गाढविपिने ''इक्वीटोस'' नामकम् एकं नगरम् अस्ति । तस्मिन् चतुर्लक्षाधिकाः जनाः वसन्ति । तत्र गन्तुम् एकः एव मार्गः अस्ति । नद्याः विपिनस्य अधिकाधिकः भागः ब्राझिलदेशे, पेरुदेशे तथा च कोलम्बियादेशे विस्तीर्णः अस्ति । यद्यपि नदी त्रिषु देशेषु प्रवहन्ती अस्ति तथापि एतस्याः उपरि एकोऽपि सेतुः नास्ति । प्राचीनकाले एषा नदी पूर्वतः पश्चिमदिशं प्रति वहति स्म । अधुना पश्चिमतः पूर्वदिशं प्रति प्रवहति । नद्याः वनप्रदेशे ४० सहस्राधिकाः वनस्पतयः, द्वादशशताधिकाः पक्षिणः, ४२० प्रकारकाः स्तनधारिपशवः, ३७० विधाः सरीसृपाः तथा च नद्यां २२०० प्रजातीनां मत्स्याः सन्ति । विश्वे यावन्तः प्रकारकाः वनस्पतयः, पक्षिणः, पशवश्च सन्ति तेषां प्रत्येकं दशभ्यः प्रजातिभ्यः एका प्रजातिः अत्र निश्चयेन प्राप्यते । किमधिकं वदानि ! पृथ्व्याः वायुमण्डले जायमानस्य प्राणवायोः २० प्रतिशतं प्राणवायुः तु एमेझोननद्याः वनप्रदेशात् एव जायते ।

## शब्दमञ्जूषा

| | | |
|---|---|---|
| **प्रवालः** | अङ्कुर | sprout |
| **विन्यासः** | सौंपना | entrusting |
| **वेदना** | पीडा | pain |
| **उग्रकाण्डः** | करेला | bitter gourd |
| **भामिनी** | सुंदर तरुणी | beautiful young woman |
| **गात्रम्** | शरीर | body |
| **रक्षः** | राक्षस | demon |
| **तूष्णीकाम्** (अव्यय) | मौन | silent |
| **कन्दरः** | गुहा | cave |
| **कोटरः** | वृक्ष की खोखर | hallow of tree |
| **गृध्रः** | गिद्ध | vulture |
| **गीर्वाणः** | देव | god |
| **अनर्घम्** (विशेषणम्) | अमूल्य | invaluable |
| **जीमूतः** | मेघ | cloud |
| **आच्छेदनम्** | काट देना | Cutting off |

## किं भवन्तः जानन्ति ?

**१ ) एतेषु कः पद्यरचनाभिः कृष्णस्य बाललीलानां वर्णनम् अकरोत् ?**
(क) कुम्भनदासः (ख) सूरदासः (ग) रत्नाकरः (घ) गिरिधरः

**२ ) एतेषु चतुर्षु धामसु किं धाम पूर्वदिशि वर्तते ?**
(क) जगन्नाथधाम (ख) वैद्यनाथधाम (ग) द्वारकानाथधाम (घ) बदरीनाथधाम

**३ ) स्वामिनः दयानन्दस्य जन्म गुजराते कस्मिन् ग्रामे जातः आसीत् ?**
(क) राजपुरे (ख) शिवपुरे (ग) शङ्करगढे (घ) टङ्काराग्रामे

**४ ) एतेषु कस्मिन् ग्रामे सावरकरस्य जन्म अभवत् ?**
(क) भगूरे (ख) चिरग्रामे (ग) बेनीपुरे (घ) लमहीग्रामे

**५ ) प्राचीनभारतीयशिक्षायाः प्रमुखं केन्द्रं तक्षशिला सम्प्रति कस्मिन् देशे वर्तते ?**
(क) चनदशे (ख) अफगानिस्तानदेशे (ग) पाकिस्तानदेशे (घ) भूटानदेशे

**६ ) अजन्ता च एलोरा च गुहे कस्मिन् प्रान्ते वर्तते ?**
(क) महाराष्ट्रे (ख) हरियाणायाम् (ग) उत्तरप्रदेशे (घ) मध्यप्रदेशे

**७ ) महाभारतकालीनम् इन्द्रप्रस्थनगरं सम्प्रति केन नाम्ना प्रचलितं वर्तते ?**
(क) पानीपत (ख) आगरा (ग) दिल्ली (घ) फरीदाबाद

उत्तराणि – (१) ख (२) क (३) घ (४) क (५) ग (६) क (७) ग

# अस्माकम् आगामिकार्यक्रमाः

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

**Online / Offline**

**Admission Open**

## संस्कृतभाषाशिक्षणम्

### First Level

**Date :** 23/08/24 to 30/11/24
**Day :** Mon-Wed-Fri
**Time :** 7:00am to 8:30am
**Fees :** 6000/-

### Third Level

**Date :** 23/08/24 to 30/11/24
**Day :** Mon-Wed-Fri
**Time :** 6:30pm to 8:00pm
**Fees :** 6000/-

संस्कृत-
## साम्प्रतम्

नमस्कारः

यदि भवन्तः ''साम्प्रतम्'' मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

**ग्राहक शुल्कम्**

वार्षिकं रू – 100
द्वैवार्षिकं रू – 175
त्रैवार्षिकं रू – 250
अङ्कमूल्यं रू – 10

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

- શું તમે સંસ્કૃત બોલવા ઈચ્છો છો?
- શું તમે સંસ્કૃત ભાષાનાં ઉત્તમ શિક્ષક બનવા ઈચ્છો છો ?
- શું તમે સંસ્કૃતને સંસ્કૃત માધ્યમમાં ભણાવવા ઈચ્છો છો ?
- શું તમે સંસ્કૃતક્ષેત્રે ઉત્તમ કારકિર્દી બનાવવા ઈચ્છો છો ?

તો અહીં છે, એક તક એકલવ્ય સંસ્કૃત એકેડેમી દ્વારા આયોજિત

## "Diploma In Sanskrit Teaching"

**શ્રીસોમનાથ સંસ્કૃત યુનિવર્સિટી** માન્ય કોર્ષમાં
ભાગ લો અને ઉત્તમ શિક્ષક બનો.

- કોઈપણ પ્રવાહમાં ધોરણ ૧૨ પાસ, પ્રવેશને યોગ્ય.
- મર્યાદિત ૨૫ બેઠકો.
- પ્રવેશપત્ર કોરહાઉસ, ઓફ. સી જી રોડ ખાતે ઉપલબ્ધ.

**અભ્યાસક્રમની વિશેષતા :**

→ તાલીમ માટેનું ગુણવત્તાયુકત વાતાવરણ.
→ પ્રત્યક્ષપદ્ધતિ દ્વારા શિક્ષણ.
→ અનુભવી શિક્ષકો દ્વારા શિક્ષણ.
→ શ્રેષ્ઠ તાલીમાર્થીઓ માટે નોકરીની ઉત્તમ તક.

વધુ માહિતી માટે સંપર્ક કરોઃ ડો. મિહિર ઉપાધ્યાય **9824616237**

**प्रियवाचकाः**

- भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।
- पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006